# चतुश्श्लोकी भागवतं

## चतुश्श्लोकी भागवतं

श्री भगवानुवाच |
ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितं |
सरहस्यं तदंगं च गृहाण गदितं मया || 1 ||

यावानहं यथाभावो यद्रूपगुणकर्मकः |
तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् || 2 ||

अहमेवासमेवाग्रे नान्यद्यत्सदसत्परं |
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहं || 3 ||

ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि |
तद्विद्यादात्मनो मायां यथाऽऽभासो यथा तमः || 4 ||

यथा महांति भूतानि भूतेषूच्चावचेष्वनु |
प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहं || 5 ||

एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनाऽऽत्मनः |
अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा || 6 ||

एतन्मतं समातिष्ठ परमेण समाधिना |
भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित् || 7 ||